# ॥ नवग्रहमङ्गलाष्टकम् ॥

भास्वानर्कसमिच्च रक्तकिरणः सिंहाधिपः काश्यपो
गुर्विन्दोश्च कुजस्य मित्रमरिगः त्रिस्थः शुभः प्राङ्मुखः ।
शत्रुर्भार्गवसौरयोः प्रियः कुजः कालिङ्गदेशाधिपो
मध्ये वर्तुलमण्डले स्थितिमितः कुर्यात् सदा मङ्गलम् ॥ १ ॥

चन्द्रः कर्कटकप्रभुः सितरुचिश्चात्रेयगोत्रोद्भवः
चाग्नेये चतुरश्रकोऽपरमुखो गौर्यर्चया तर्पितः ।
षट्सप्ताग्निदशाद्यशोभनफलोऽशत्रुर्बुधार्कप्रियः
सौम्यो यामुनदेशपर्णजसमित्कुर्यात् सदा मङ्गलम् ॥ २ ॥

भौमो दक्षिणदिक्त्रिकोणनिलयोऽवन्तीपतिः खादिर-
प्रीतो वृश्चिकमेषयोरधिपतिर्गुर्वर्कचन्द्रप्रियः ।
ज्ञारिः षट्त्रिशुभप्रदश्च वसुधादाता गुहाधीश्वरो
भारद्वाजकुलाधिपोऽरुणरुचिः कुर्यात् सदा मङ्गलम् ॥ ३ ॥

सौम्यः पीत उदङ्मुखः समिदपामार्गोऽत्रिगोत्रोद्भवो
बाणेशानगतः सुहृद्रविसुतो वैरीकृतानुष्णरुक् ।
कन्यायुग्मपतिर्दशाष्टमचतुःषण्णेत्रगः शोभनो
विष्ण्वाराधनतर्पितो मगधपः कुर्यात् सदा मङ्गलम् ॥ ४ ॥

जीवश्चोत्तरदिङ्मुखोत्तरककुभ्जातोऽङ्गिरो गोत्रदः
पीतोऽश्वत्थसमिच्च सिन्ध्वधिपतिः चापर्क्षमीनाधिपः ।
सूर्येन्दुक्षितिजप्रियः सितबुधारातिः समो भानुजे
सप्तापत्यतपोऽर्थगः शुभकरः कुर्यात् सदा मङ्गलम् ॥ ५ ॥

शुक्रो भार्गवगोत्रजः सितरुचिः पूर्वाननः पूर्वदिक्
काम्बोजाधिपतिस्तुलावृषभगश्चौदुम्बरैस्तर्पितः ।
सौम्यार्क्यौः सुहृदम्बिकास्तुतिवशात् प्रीतोर्कचन्द्राहितो
नारीभोगकरः शुभो भृगुसुतः कुर्यात् सदा मङ्गलम् ॥ ६ ॥

सौरिः कृष्णरुचिश्च पश्चिममुखः सौराष्ट्रपः काश्यपो
नाथः कुम्भमृगर्क्षयोः प्रियसुहृत् शुक्रज्ञयोर्रुद्रगः ।
षड्त्रिस्थः शुभदो शुभो धनुर्गतिश्चापाकृतौ मण्डले
सन्तिष्ठन् चिरजीवितादिफलदः कुर्यात् सदा मङ्गलम् ॥ ७ ॥

राहुर्बर्बरदेशपो निर्ऋतौ कृष्णाङ्गशूर्पासनो
याम्याशाभिमुखश्च चन्द्ररविरुध् पैडीनसिः क्रौर्यवान् ।
षड्त्रिस्थः शुभकृत् करालवदनः प्रीतश्च दूर्वाहुतौ
दुर्गापूजनतः प्रसन्नहृदयः कुर्यात् सदा मङ्गलम् ॥ ८ ॥

केतुर्जैमिनिगोत्रजः कुशसमिद्वायव्यकोणेस्थितः
चित्राङ्कध्वजलाञ्छनो हि भगवान् याम्याननः शोभनः ।
सन्तुष्टो गणनाथपूजनवशात् गङ्गादितीर्थप्रदः
षड्त्रिस्थः शुभकृच्च चित्रिततनुः कुर्यात् सदा मङ्गलम् ॥ ९ ॥

॥ इति श्री-नवग्रहमङ्गलाष्टकं सम्पूर्णम् ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Navagraha_Mangalashtakam.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits